सप्तमः अध्यायः

# अस्माकं देशः भारतम्



भारतं कश्चन भौगोलिकदृष्ट्या अतिविस्तीर्णः देशः वर्तते । उत्तरे एषः हिमालयस्य उन्नतैः शिखरैः आवृतः अस्ति । पश्चिमे अरबसागरः पूर्वे बङ्गालस्य खातः तथा च दक्षिणे हिन्दमहासागरः भारतीय-प्रायद्वीपानां तटेषु तरङ्गायन्ते ।

प्रायद्वीपः स्थलस्य सः भागः वर्तते यः पक्षत्रयतः जलेन आवृतः वर्तते (चित्रम् 6.1)।

भारतस्य क्षेत्रफलं 32.8 लक्ष-वर्ग-किलोमीटरपरिमितं अस्ति । उत्तरे काश्मीराद् आरभ्य दक्षिणे कन्याकुमारीपर्यन्तम् एषः विस्तारः प्रायेण 3,200 किलोमीटरपरिमितं अस्ति । तथा च पूर्वे अरुणाचलप्रदेशात् आरभ्य पश्चिमे कच्छयावत् अस्य विस्तारः प्रायेण 2,900 किलोमीटरपरिमितो अस्ति । उन्नताः पर्वताः भारतीयानि महामरुस्थलानि उत्तरसमक्षेत्राणि असमानप्रस्तारभागाः तटीयभागाः द्वीपसमूहाः च स्थलरूपाणां विभिन्नतां प्रदर्शयन्ति । यत्र वातावरणेन वनस्पत्या वन्यजीवैः च सह भाषासंस्कृतौ अपि महती भिन्नता अस्ति । एतस्यां भिन्नतायाम् अपि वयम् एकतां पश्यामः । या अस्माकं परस्परं दृश्यते । एतत् एव कारणं अस्ति यत् वयम् एकस्मिन् एव राष्ट्रे बद्धाः स्मः । 2011 तमवर्षात् एतावत् पर्यन्तं भारतस्य जनसङ्ख्या 120 कोट्यधिका जाता अस्ति । एषः चीनस्य अनन्तरं विश्वस्य द्वितीयः सर्वाधिकजनसङ्ख्यापूर्णः देशः अस्ति ।

**जानन्ति किं भवन्तः:?**

विशालाः देशाः येषां विस्तारः पूर्वभागतः पश्चिमभागं प्रति अधिकः भवति तत्र सम्पूर्णस्य देशस्य मानकसमयः एकः न भवति। संयुक्तराज्य-अमेरिकायां 7 तथा च कनाडायाः 6 मानकसमयाः वर्तन्ते। किं भवन्तः जानन्ति यत् रूसे कति मानकसमयाः सन्ति ?

## स्थितिः

भारतम् उत्तरीगोलार्द्धे स्थितः अस्ति । कर्करेखा ($23^0 30$’उ.) देशस्य प्रायेण मध्यभागतः गच्छति (चित्रम् - 7.2) । दक्षिणात् उत्तरं प्रति भारतस्य मुख्यभूमेः विस्तारः $8^0 4$’ उ. तथा च $37^0 6$’उ. अक्षांशानां मध्ये अस्ति । पश्चिमात् आरभ्य पूर्वपर्यन्तं भारतस्य विस्तारः $68^0 7$’ पू. तथा च $97^0 25$’ पू.देशान्तराणां मध्ये अस्ति । यदि वयं विश्वं पूर्वीगोलार्द्धे पश्चिमीगोलार्द्धे वा वण्टयामः तर्हि भारतस्य स्थितिः कस्मिन् गोलार्द्धे भविष्यति ? अतीव विशालस्य देशान्तरीयस्य विस्तारस्य प्रायेण $29^0$ इत्यस्य कारणेन अत्रत्य भागद्वये स्थितानां स्थानानां स्थानीये काले महत् अन्तरं भवितुं शक्नोति स्म । एतादृशानां सुदूरस्थानानां मध्ये कालस्य

अन्तरं प्रायेण घण्टाद्वयात्मकं भविष्यति । यथा भवन्तः पूर्वम् अपठन्, यत् प्रत्येकं $1^0$ देशान्तराय स्थानीयसमये 4 निमेषाणाम् अन्तरं भवति। पश्चिमे गुजरातस्य अपेक्षया पूर्वस्य अरुणाचलप्रदेशे सूर्योदयः प्रायेण घण्टाद्वयपूर्वं भवति । भवन्तः पूर्वं पठितवन्तः सन्ति यत् $82^0 30'$ पू. देशान्तरस्य स्थानीयसमयः भारतस्य मानकसमयः किमर्थं मन्यते । अयं याम्योत्तरः भारतस्य मानक-याम्योत्तरम् अपि कथ्यते ।

## भारतस्य प्रतिवेशिनः देशाः

सप्तदेशानां स्थलीयसीमाः अस्य सीमाभिः युक्ताः सन्ति । 7.1 – चित्रमाध्यमेन एतेषां देशानां नामानि जानन्तु।




*चित्रम् – 7.1 भारतम् एवं च तस्य प्रतिवेशिनः देशाः*




*चित्रम् – 7.2 भारतस्य राजनैतिकं मानचित्रम्*

*** जूनमासे 2014 तमे वर्षे तेलङ्गाना भारतस्य एकोनत्रिंशं/ नवविंशं राज्यं जातम्**

एतेषु के के देशाः सन्ति येषां सीमाः समुद्रेण युक्ताः न सन्ति ? दक्षिणे समुद्रे स्थितौ द्वौ श्रीलङ्का-तमालदीवद्वीपौ अस्माकं प्रतिवेशिनौ स्तः। पाकजलसन्धिः भारतं श्रीलङ्कातः पृथक् करोति।

## राजनैतिकम् एवं च  प्राशासनिकं विभाजनम्

भारतं कश्चन विशालः देशः वर्तते। प्राशासनिक-गतिविधीनां क्रियान्वयनाय  देशः 29 राज्येषु 7 न्द्रशासित-प्रदेशेषु च विभाजितः अस्ति।




**चित्रम् 7.3** भारतम् : भौतिकं विभाजनम्

बहूनि पर्वतीयस्थानानि अत्र लोकप्रियाणि सन्ति। पञ्च पर्वतीयस्थानानां नामानि अन्विष्यन्तु । शैवालिक इत्येषा अत्यधिका दक्षिणभागे स्थिता शृङ्खला अस्ति । देहली भारतस्य राजधानी अस्ति । राज्यानां निर्माणं मुख्यतः भाषाणाम् आधारेण अभवत्। क्षेत्रफलस्य दृष्ट्या बृहत्तमं राज्यं राजस्थानं तथा च लघुतमं राज्यं गोवा अस्ति । राज्यानि जनपदेषु विभाजितानि सन्ति।

## भौतिक–विभाजनम्

भारते उपलभ्यमाना भौतिकाकृतयः विभिन्नप्रकारकाः सन्ति यथा पर्वतः, प्रस्थः, तटः द्वीपसमूहः च । उत्तरे हिमाच्छादितः हिमालयः प्रहरिणः कार्यं करोति । हिम+आलयः इत्यस्य अर्थः भवति हिमस्य गृहम्। हिमालयपर्वतः तिसृषु मुख्यसमान्तरशृङ्खलासु विभज्यते । सर्वथा उत्तरे स्थिता शृङ्खला महा -हिमालयः अथवा हिमाद्रिः इति कथ्यते। एतस्याम् एव शृङ्खलायां विश्वस्य सर्वोच्चशिखराः सन्ति । **मध्यहिमालयः** अथवा **हिमाचलं** हिमाद्र्याः दक्षिणे स्थिता शृङ्खला अस्ति।

हिमालयस्य दक्षिणे **भारतस्य उत्तरी-क्षेत्राणि** स्थितानि सन्ति । एतानि क्षेत्राणि समतलानि प्रथितानि च सन्ति। एतानि क्षेत्राणि सिन्धु-गङ्गा-ब्रह्मपुत्रैः तथा च एतासां सहायकनदीभिः आनीतेभ्यः जलोढ-निक्षेपैः निर्मितानि सन्ति । नदीनाम् एतानि क्षेत्राणि कृष्यर्थं उर्वरां भूमिं यच्छन्ति । एतद् एव कारणम् अस्ति यत् एतेषु क्षेत्रेषु जनसङ्ख्या अधिका अस्ति।

भारतस्य पश्चिमीभागे **भारतीयमहामरुस्थलं** स्थितम् अस्ति। इदं शुष्कोष्णसैकतस्थानम् अस्ति। अत्र वनस्पतेः मात्रा न्यूनतमा अस्ति।

**जलोढनिक्षेपः** – एषः नदीभिः आनीतमृत्तिका भवति तथा च नदीबेसिन इत्यस्मिन् निक्षिप्यते। **सहायकनदी-** एका नदी अथवा सरित् या मुख्यनद्यां कुतश्चिदपि आगत्य मिलति तथा च स्वजलस्य मुख्यनद्यां विसर्जनं करोति (चित्रम् 6.1)|

**किं भवन्तः जानन्ति ?**

गङ्गाब्रह्मपुत्रनद्यौ विश्वस्य बृहत्तमस्य नदीमुखपुलिनस्य निर्माणं कुरुतः, यच्च सुन्दरवननदीमुखपुलिनम् इत्यपि उच्यते । अस्य नदीमुखपुलिनस्य आकृतिः त्रिभुजाकारा अस्ति । नदीमुखपुलिनं स्थलस्य सः भागः अस्ति यः नद्याः मुखपुलिने निर्मीयते (यत्र नद्यः समुद्रं प्रविशन्ति तत् स्थलं नदीमुखपुलिनम् इति उच्यते (चित्रम् – 6.1)|

**आगच्छन्तु किञ्चित् कृत्वा शिक्षेम**

बह्वीनां बालिकानां नामानि नदीनां नामसु भवति यथा यमुना मन्दाकिनी कावेरी च। किं भवन्तः स्वपरिवेशस्थां काञ्चित् बालिकां जानन्ति यस्याः नाम कस्याश्चित् नद्याः नाम्नः उपरि अस्ति? स्वमातापित्रोः तथा च अन्येषां साहाय्येन एतादृशानां नाम्नां काञ्चित् सूचीं सज्जीकुर्वन्तु। किं भवन्तः जलसम्बन्धीनि अन्यानि नामानि अपि अन्वेष्टुं शक्नुवन्ति, यथा शबनम्।

उत्तरीक्षेत्राणां दक्षिणभागे **प्रायद्वीपीयप्रस्थः** इति स्थितः अस्ति । एतेषाम् आकृतिः त्रिभुजाकारा अस्ति । एतस्य धरातलः नतोन्नतः अस्ति । एतस्मिन् क्षेत्रे अनेकाः पर्वतशृङ्खलाः तथा च उपत्यकाः विद्यमानाः सन्ति । एतस्य उत्तरपश्चिमे अरावलीशृङ्खला स्थिता अस्ति या विश्वस्य प्राचीनतमा शृङ्खला अस्ति । **विन्ध्यशृङ्खला सतपुडाशृङ्खला** च अपि महत्त्वपूर्णे शृङ्खले

**किं भवन्तः जानन्ति ?**

**प्रवालः** इति लघुसामुद्रिकजन्तूनां अस्थिपञ्जराः सन्ति यः **पॉलिप** इति उच्यते। यदा जीवितपॉलिपाः म्रियन्ते तदा तेषाम् अस्थिपिञ्जरः अवशिष्यते। अन्यपॉलिपानां वृद्धिः एतेषां दृढीभूतानाम् अस्थिपिञ्जराणाम् उपरि भवति ये वृद्धिम् उपगच्छन् महोन्नताः जायन्ते तथा च अनेन प्रकारेण प्रवालाः इति द्वीपानां निर्माणं कुर्वन्ति । 7.4 इति चित्रे प्रवालः इति द्वीपान् दर्शयति ।



*चित्रम् -7.4 प्रवाल-द्वीपः*

स्तः। एताभ्यः शृङ्खलाभ्यः भूत्वा नर्मदानदी तापीनदी च प्रवहतः । एते पश्चिमं प्रति प्रवहन्त्यौ नद्यौ स्तः ये अरबसागरे पतन्ति । अस्य प्रस्तारस्य पश्चिमे पश्चिमीघाटः अथवा सह्याद्रिः तथा च पूर्वे पूर्वीघाटः स्थितः अस्ति । पश्चिमीघाटस्य विस्तारः समानरूपेण अस्ति अपरञ्च पूर्वीघाटः मध्ये मध्ये त्रुटितः तथा च असमानः अस्ति (चित्रम् – 7.3)| एतेषु प्रस्तारेषु खनिजानां यथा अङ्गारस्य लौहायस्कस्य प्राचुर्यम् अस्ति ।

**सुनामी**

एकदा प्रातः मनुष्ये, पतिता जलौघस्य कृष्णा छाया ।
सुनामीदानवी भीकररूपेण, प्रलयंकारिणी जनिताऽपद् यया ॥
समुद्रे उत्थितमालोडनं, प्रसृतं योजनं दूरं भयङ्करम् ।
प्रकृतिविनाशेन हि तेन, मनुष्यः कालकवलीकृतः ।।
विकरालरूपो विनाशस्तदा, परितो हाहाकारो जातः ।
त्राहि नस्त्राहि नो जनाः, पलायिताः प्राणरक्षणाय ॥
रक्षितो न हि कोऽपि तस्माद्, यः कालोऽयं प्रचण्डोऽवर्तत ॥
हिन्दमहासागरोऽस्माकं रक्षको यः, जातस्तदा भक्षको हि सः ।
निगीर्णा जनाः तेन , विनश्य ह्यस्तित्वं सर्वम् ॥
साहाय्यकर्तुकामा हस्ताः, उत्थिताः सहस्रशस्तदा ।
सागरदर्पपातनाय , पीडितरक्षणाय दुःखितसेवनाय ॥
रात्रिर्गमिष्यति कृष्णा, सुप्रभातं भविष्यति ।
आशाकिरणा उदेष्यन्ति , जीवने प्रसन्नता प्रसरिष्यति ॥




'सुनामी'

पश्चिमघट्टस्य पश्चिमभागे तथा च पूर्वघट्टस्य पूर्वभागे तटीयक्षेत्राणि स्थितानि सन्ति। पश्चिमीतटीयक्षेत्राणि बहुसङ्कीर्णानि सन्ति । पूर्वीतटीयक्षेत्राणि अपेक्षाकृत् प्रथितानि सन्ति। तत्र पूर्वं प्रति प्रवहमाणाः अनेकाः नद्यः सन्ति । **महानदी गोदावरी कृष्णा कावेरी** च बङ्गालस्य आखाते निपतन्ति । इमाः नद्यः स्वीयमुखपुलिने उर्वरनदीमुखपुलिनस्य निर्माणं कुर्वन्ति। बङ्गालस्य आखाते गङ्गाब्रह्मपुत्रनद्योः नदीमुखे सुन्दरवननदीमुखपुलिनं स्थितम् अस्ति।

भारते द्वौ द्विपसमुहौ अपि स्तः। लक्षद्वीपद्वीपसमूहः अरबसागरे स्थितः अस्ति। एतौ केरलस्य तटात् किञ्चिद्-दूरे स्थितौ प्रवालद्वीपौ स्तः। **अण्डमानं तथा च निकोबारद्वीपसमूहः** भारतात् दक्षिण-पूर्व-दिशायां बङ्गालस्य आखाते स्थितः अस्ति। किं भवन्तः जानन्ति यत् कः द्वीपसमूहः 2004 तमे वर्षे सुनामीदुरापदा प्रभावितः जातः ? वार्तापत्राणां तथा च जनैः सह वार्तालापस्य माध्यमेन सूचनाः प्राप्नुवन्तु यत् यदा सुनामी इति त्रासदायाः भारतीयतटेन सह संघट्टनं जातं तदा केन प्रकारेण विभिन्नैः जनैः एतस्याः सुनाम्याख्यायाः त्रासदायाः सम्मुखीकरणं कृतम् आसीत्। सुनामी कश्चित् विशालः सागरीयः तरङ्गः अस्ति यः समुद्रतले भूकम्पकारणेन उत्पद्यते ।

## अभ्यासः

### 1. निम्नलिखितप्रश्नानाम् उत्तराणि संक्षेपेण यच्छन्तु।

(i) भारतदेशस्य विभाजित-भौतिकभागानां नामानि लिखन्तु।

(ii) भारतस्य स्थलीयसीमा सप्तभिः देशैः संयुक्ता अस्ति। तेषां नामानि लिखन्तु।

(iii) के द्वे प्रमुखनद्यौ अरबसागरे पततः ?

(iv) गङ्गया ब्रह्मपुत्रेण च निर्मितस्य नदीमुखपुलिनस्य नाम लिखन्तु।

(v) भारते कति राज्यानि तथा च कति केन्द्रशासितप्रदेशाः सन्ति ? कयोः द्वयोः राज्ययोः राजधानी एका एव अस्ति ?

(vi) उत्तरीक्षेत्रेषु जनानाम् अधिका जनसङ्ख्या निवसति ?

(vii) लक्षद्वीपः प्रवालद्वीपः इति उच्यते ?

वेदनाथस्वैनः
कक्षा चतुर्थी

### 2 सम्यक् उत्तरं चिह्नितं (✓) कुर्वन्तु।

(i) हिमालयस्य पूर्णतः दक्षिणीभागः किम् उच्यते ?

क. शिवालिकः ख. हिमाद्रिः ग. हिमाचलम्

(ii) सह्याद्रिः अन्येन केन नाम्ना अभिधीयते ?

क. अरावली ख. पश्चिमीघट्टः ग. हिमाद्रिः

(iii) पाकजलसन्धिः कयोः देशयोः मध्ये स्थितः अस्ति ?

क. श्रीलङ्का तथा च मालदीवः ।

ख. भारतं तथा च श्रीलङ्का ।

ग. भारतं तथा च मालदीवः ।

(iv) अरबसागरे स्थिताः भारतीय-द्वीपसमूहाः के सन्ति ?

क. अण्डमान-निकोबारद्वीपसमूहः

ख. लक्षद्वीप-द्वीपसमूहः

ग. मालदीवः

(v) भारतस्य पुरातनतमी पर्वतशृङ्खला का अस्ति ?

क. अरावली ख. पश्चिमघट्टः ग. हिमालयः

3. रिक्तस्थानानि पूरयन्तु ।

(i) भारतस्य क्षेत्रफलं प्रायः ------------ अस्ति ।

(ii) महान् हिमालयः ------- इति नाम्ना अपि ज्ञायते ।

(iii) क्षेत्रफलदृष्ट्या --------------------- भारतस्य बृहत्तमं राज्यम् अस्ति ।

(iv) नर्मदानदी --------------------- सागरे पतति ।

(v) ----------- भारतस्य प्रायः मध्यभागतः गच्छन्ती अक्षांशरेखा अस्ति ।

मानचित्रकार्याणि ---

1. भारतस्य रेखामानचित्रे निम्नलिखतं चिह्नीकुर्वन्तु --

(i) कर्करेखाम्

(ii) भारतस्य मानकयाम्योत्तरम्

(iii) स्वस्य निवासराज्यम्

(iv) अण्डमानद्वीपसमूहं तथा च लक्षद्वीपसमूहम्

(v) पूर्वतटानि एवं च पश्चिम तटानि

इति सप्तमोऽध्यायः